# Kamakhya Dhyanam and Stotram

# કામાખ્યા ધ્યાનં સ્તોત્રં ચ

## Document Information

Text title : kAmAkhyAstotram

File name : kAmAkhyAstotra.itx

Category : devii, devI, kAmAkShI

Location : doc_devii

Proofread by : KS Ramachandran, PSA Easwaran

Source : Yoginitantra

Latest update : May 29, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# કામાખ્યા ધ્યાનં સ્તોત્રં ચ

કામાખ્યા ધ્યાનમ્

રવિશશિયુતકર્ણા કુંકુમાપીતવર્ણા
મણિકનકવિચિત્રા લોલજિહ્વા ત્રિનેત્રા ।
અભયવરદહસ્તા સાક્ષસૂત્રપ્રહસ્તા
પ્રણતસુરનરેશા સિદ્ધકામેશ્વરી સા ॥ ૧॥

અરુણકમલસંસ્થા રક્તપદ્માસનસ્થા
નવતરુણશરીરા મુક્તકેશી સુહારા ।
શવહૃદિ પૃથુતુઙ્ગા સ્વાઙ્ઘ્રિયુગ્મા મનોજ્ઞા
શિશુરવિસમવસ્ત્રા સર્વકામેશ્વરી સા ॥ ૨॥

વિપુલવિભવદાત્રી સ્મેરવક્ત્રા સુકેશી
દલિતકરકદન્તા સામિચન્દ્રાવતંસા ।
મનસિજ-દૃશદિસ્થા યોનિમુદ્રાલસન્તી
પવનગગનસક્તા સંશ્રુતસ્થાનભાગા ।
ચિન્તા ચૈવં દીપ્યદગ્નિપ્રકાશા
ધર્માર્થાદ્યૈઃ સાધકૈર્વાઞ્છિતાર્થા ॥ ૩॥

કામાખ્યા સ્તોત્રમ્

જય કામેશિ ચામુણ્ડે જય ભૂતાપહારિણિ ।
જય સર્વગતે દેવિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧॥

વિશ્વમૂર્તે શુભે શુદ્ધે વિરૂપાક્ષિ ત્રિલોચને ।
ભીમરૂપે શિવે વિદ્યે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૨॥

માલાજયે જયે જમ્ભે ભૂતાક્ષિ ક્ષુભિતેઽક્ષયે ।
મહામાયે મહેશાનિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૩॥

ભીમાક્ષિ ભીષણે દેવિ સર્વભૂતભયઙ્કરિ ।

કરાલિ વિકરાલિ ચ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૪॥

કાલિ કરાલવિક્રાન્તે કામેશ્વરિ હરપ્રિયે ।
સર્વશાસ્ત્રસારભૂતે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૫॥

કામરૂપપ્રદીપે ચ નીલકૂટનિવાસિનિ ।
નિશુમ્ભ-શુમ્ભમથનિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૬॥

કામાખ્યે કામરૂપસ્થે કામેશ્વરિ હરિપ્રિયે ।
કામનાં દેહિ મે નિત્યં કામેશ્વરિ નમોઽસ્તુ તે ॥ ૭॥

વપાનાઢ્યમહાવક્ત્રે તથા ત્રિભુવનેશ્વરિ ।
મહિષાસુરવધે દેવિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૮॥

છાગતુષ્ટે મહાભીમે કામાખ્યે સુરવન્દિતે ।
જય કામપ્રદે તુષ્ટે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૯॥

ભ્રષ્ટરાજ્યો યદા રાજા નવમ્યાં નિયતઃ શુચિઃ ।
અષ્ટમ્યાઞ્ચ ચતુર્દશ્યામુપવાસી નરોત્તમઃ ॥ ૧૦॥

સંવત્સરેણ લભતે રાજ્યં નિષ્કણ્ટકં પુનઃ ।
ય ઇદંશ‍ૃણુયાદ્ ભક્ત્યા તવ દેવિ સમુદ્ભવમ્ ॥ ૧૧॥

સર્વપાપવિનિર્મુક્તઃ પરં નિર્વાણમૃચ્છતિ ।
શ્રીકામરૂપેશ્વરિ ભાસ્કરપ્રભે પ્રકાશિતામ્ભોજનિભાયતાનને ।
સુરારિ-રક્ષઃસ્તુતિપાતનોત્સુકે ત્રયીમયે દેવનુતે નમામિ ॥ ૧૨॥

સિતાસિતે રક્તપિશાઙ્ગવિગ્રહે રૂપાણિ યસ્યાઃ પ્રતિભાન્તિ તાનિ ।
વિકારરૂપા ચ વિકલ્પિતાનિ શુભાશુભાનામપિ તાં નમામિ ॥ ૧૩॥

કામરૂપસમુદ્ભૂતે કામપીઠાવતંસકે ।
વિશ્વાધારે મહામાયે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૪॥

અવ્યક્તવિગ્રહે શાન્તે સન્તતે કામરૂપિણિ ।
કાલગમ્યે પરે શાન્તે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૫॥

યા સુષુમ્નાન્તરાલસ્થા ચિન્ત્યતે જ્યોતિરૂપિણિ ।
પ્રણતોઽસ્મિ પરાં ધીરાં કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૬॥

દંષ્ટ્રાકરાલવદને મુણ્ડમાલોપશોભિતે ।
સર્વતઃ સર્વગે દેવિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૭॥

ચામુણ્ડે ચ મહાકાલિ કાલિ કપોલહારિણિ ।
પાશહસ્તે દણ્ડહસ્તે કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૮॥

ચામુણ્ડે કુલમાલાસ્યે તીક્ષ્ણદંષ્ટ્રામહાવલે ।
શવયાનાસ્થિતે દેવિ કામેશ્વરિ નમોઽસ્તુ તે ॥ ૧૯॥

Proofread by KS Ramachandran, PSA Easwaran

---

*Kamakhya Dhyanam and Stotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*